संस्कृतवार्ता:

दिनाङ्क: - 13.12.2024 सायम्  - 06:20

मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य प्रयागराजे सार्धपञ्च--सहस्र-कोटि-रूप्यकाणां परियोजनानाम् उद्घाटनम् अकरोत्। प्रधानमन्त्री अवोचत् यत् आगामिनि वर्षे महाकुम्भस्य आयोजनम् एकतायाः तादृशः महायज्ञः भविष्यति यस्य चर्चा सम्पूर्ण-विश्वे भविष्यति।
- 

  लोकसभायाम् अद्य भारतीय-संविधानस्य पञ्च-सप्तति-वर्ष-पूर्तेः भव्य-यात्रायां द्वि-दिवसीया विशेष-चर्चा प्रारब्धा।

- विदेश-मन्त्री डॉ. एस.जयशङ्करः अवदत् आशास्यते यत् बाङ्ग्लादेशः राष्ट्रहितं निध्याय तादृशोपायान् करिष्यति येन अल्पसङ्ख्यकाः तत्र सुरक्षिताः भवेयुः।

- राष्ट्रम् अद्य एकाधिक-द्विसहस्र-तमे वर्षे दुरापादिते आतङ्कि-आक्रमणकाले संसद: रक्षणार्थं स्वप्राणान् त्यक्तान् वीरान् प्रति श्रद्धाञ्जलिम् अर्पयति ।

- तमिलनाडु-राज्ये वर्षा-कारणेन नैकेषु जनपदेषु जनजीवनं दुष्प्रभावितम्।

प्रधानमन्त्री महाकुम्भः

प्रधानमन्त्री नरेन्द्र-मोदी अवोचत् यत् आगामिनि वर्षे महाकुम्भस्य आयोजनम् एकतायाः तादृशः महायज्ञः भविष्यति यस्य चर्चा सम्पूर्ण-विश्वे भविष्यति। अद्य उत्तरप्रदेशस्य सङ्गम-नगर्याः प्रयागराजे एकां जनसभां सम्बोधयता प्रधानमन्त्रिणा महाकुम्भस्य औपचारिकोद्घाटनमपि कृतम्। अवधेयं यत् महाकुम्भः आगामिन: जनवरी-मासस्य त्रयोदश-दिनाङ्कात् आरभ्य फरवरी-मासस्य षड्विंशतिः दिनाङ्कं यावत् भविष्यति। अत्रावसरे प्रधानमन्त्री सार्धपञ्च--सहस्र-कोटि-रूप्यकाणां परियोजनानाम् उद्घाटनम् अकरोत्। आगामिने वर्षे महाकुम्भस्य आयोजनं देशस्य आध्यात्मिक-सांस्कृतिक-परिचयं नूतन-शिखरं प्रति

नेष्यति। एकभारत-श्रेष्ठभारत- इत्यस्य चर्चां विधाय श्रीमोदिना स्वच्छतायाः प्रतिबद्धता अपि प्रकटिता।

प्रधानमन्त्रिणा कुम्भ-सहायक एआई चेट बॉट इत्येतत् अपि लोकार्पितम्। येन तीर्थयात्रिण: कुम्भ-विषयकं विवरणम् प्राप्स्यन्ते।

श्रीमोदी अवदत् यत् ऐषम: कुम्भ-मेलापकम् प्रौद्योगिकी-एआई इत्येतयो: सङ्गमाय ज्ञास्यते। प्रधानमन्त्रिणा उक्तं यत् अस्य आयोजनस्य भव्य-दिव्य-सफलतायै अहं भवद्भ्यः सर्वेभ्यः शुभकामनाः यच्छामि।

लोकसभायां संविधानम्

लोकसभायाम् अद्य भारतीय-संविधानस्य पञ्च-सप्तति-वर्ष-पूर्तेः भव्य-यात्रायां द्विदिवसीया विशेष-चर्चा प्रारब्धा। चर्चायाः प्रारम्भं कुर्वन् रक्षा-मन्त्री राजनाथ-सिंहः अवोचत् यत् भारतीय-संविधानेन सामाजिकार्थिक-राजनीतिक-सांस्कृतिक-जीवनस्य च समेपि पक्षाः स्वीकृत्य राष्ट्र-निर्माणस्य मार्गः प्रशस्तीकृतः।

तेन उक्तं यत् संविधानं देशस्य सांस्कृतिक-मूल्यानाम् अभिव्यक्तिरस्ति।

विदेश-मन्त्री बाङ्ग्लादेशः

विदेश-मन्त्री डॉ. एस.जयशङ्करः अवदत् आशास्यते यत् बाङ्ग्लादेशः राष्ट्रहितं निध्याय तादृशोपायान् करिष्यति येन अल्पसङ्ख्यकाः तत्र सुरक्षिताः भवेयुः। अद्य लोकसभाम् पूरक-प्रश्नस्य उत्तरे डॉ.जयशङ्करेण उक्तं यत् बांग्लादेशे अल्प-सङ्ख्यकेषु नैकानि आक्रमणानि चिन्ता-विषयकानि वर्तन्ते। अथ च भारतेन बाङ्ग्लादेशस्य अधिकारिणां ध्यानम् अस्मिन् प्रकरणे आकृष्टम् । अपि च उक्तं यत् अस्मिन् सम्बन्धे विदेश-सचिवेन सद्य एव ढाका यात्रा कृता। विदेशमन्त्रिणा प्रोक्तं यत् बाङ्ग्लादेशे भारतस्य साहाय्येन विकास-परियोजनानां भद्रम् ऐतिह्यं वर्तते। अमुना आशा प्रकटिता यत् बाङ्ग्लादेशे नूतन-शासनं परस्परं लाभप्रदं स्थिर-सन्बन्धं च सुनेश्चिष्यति।

संसदि हुतिङ्गतेभ्यः श्रद्धाञ्जलिः

एकाधिक-द्विसहस्र-तमे वर्षे अद्यैव दुरापादिते आतङ्कि-आक्रमणकाले संसदः रक्षणार्थं स्वप्राणान् त्यक्तान् वीरान् प्रति अद्य समग्रराष्ट्रम् तेभ्यः वीरसैनिकेभ्यः श्रद्धाञ्जलिम् अर्पयति । भयोत्पादक-आक्रमणे अष्टौ सुरक्षाकर्मिणः हुतात्माः अभवन् । हुतात्मान् स्मृत्य राष्ट्रपतिः द्रौपदीमुर्मूः, उपराष्ट्रपतिः जगदीप-धनखडः, प्रधानमन्त्री नरेन्द्र-मोदी च उक्तवन्तः यत् तेषां वीरतायाः निःस्वार्थ-सेवायाः च कृते देशः सर्वदा कृतज्ञो वर्तते इति । निज-सन्देशे राष्ट्रपतिः आतङ्कवादात् निवारणार्थं भारतस्य अविचल-संकल्पं प्रत्यावर्तयत् तथा च आतङ्कवादस्य विरुद्धं राष्ट्रम् एकीकृतम् वर्तते इति अवधानं दत्तवती । उपराष्ट्रपतिः जगदीपधनखडः, लोकसभाध्यक्षः ओम् बिरलाः , प्रधानमन्त्री नरेन्द्र-मोदी, केन्द्रीय-गृह-मन्त्री अमितशाहः च अद्य प्रातः नवदिल्ल्यां संसत्भवन-परिसरे हुतात्मानः प्रति पुष्पांजलिम् अर्पितवन्तः। पश्चात् स्वकीये सन्देशे प्रधानमन्त्रिणा निगदितं यत्, हुतात्मानां त्यागः राष्ट्रं सर्वदा प्रेरयिष्यति इति। लोकसभायां राज्यसभायां च सदस्याः वीर-सुरक्षा-कर्मिणां सम्मानार्थं मौनमपि आचरितवन्तः। राज्यसभायाः सभापतिः जगदीप-धनखडः अवदत् यत्, भयोत्पादकेभ्यः दुर्भावनापूर्ण-दुष्ट-योजनां निष्फलीकर्तुं सुरक्षाकर्मिणां दृढं शौर्यम् आसीत् इति। अध्यक्षः ओम्. बिरलाः अवदत् यत् अस्य दुःखद-आक्रमणस्य त्रयो विंशति-तम-वर्षपूर्तौ सदनमेतत् आतङ्कवादं विरुद्ध्य दृढतया सङ्कल्पं पुनरुद्धाटयति इति । यदा लोकसभायाः कार्या-चरणं समारब्धं तावत् अध्यक्षेण ओम बिरला इत्यनेन कथितं यत् अस्मिन्नेव दिने संसदः सुरक्षाकर्मिणः अनुकरणीयवीरतायाः साहसस्य च परिचयं दत्वा आतङ्कीनां प्रयासं विफलं कृतवन्तः।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

छत्तीसगढे माओवादिनौ व्यापादितौ

छत्तीसगढ-राज्ये अद्य बिजापुर-जनपदस्य बसगुडा-क्षेत्रे सुरक्षाबलैः सह जाते सङ्घर्षे द्वौ माओवादिनौ व्यापादितौ। सुरक्षा-बलेन प्रहार-स्थलात् प्रबल-मात्रायां शस्त्राणि स्फोटकास्त्राणि च प्राप्तानि। अस्मिन् क्षेत्रे अन्वेषणाभियानं प्रचलति स्म यदा अन्तिमानि प्रतिवेदनानि प्राप्तानि।

बाङ्ग्लादेशः

बाङ्ग्लादेशे चटगांव-स्थितेन न्यायालयेन हिन्दू-पुजारिणः चिन्मय-कृष्णा-दासस्य प्रतिभूतये सर्वोच्च-न्यायालयस्य वरिष्ठाधिवक्तुः याचिका स्वीकृता। परं न्यायाधीशेन याचिकायै शीघ्रं वादश्रवणस्य अनुमतिः नैव प्रदत्ता। वार्ताभिकरणाम् अनुसारेण बाङ्ग्लादेशस्य उच्चतम-न्यायालयस्य अधिवक्तुः मानवाधिकार-कार्यकर्तुः रबिन्द्र-घोषस्य याचिका न्यायाधीशेन प्रपत्रेषु संरक्षिता । वादश्रवणाय च जनवरी मासस्य द्वितीयो दिवसः निर्धारितः।

अवधेयं यत् बुधवासरे अपि न्यायालेन शीघ्रं प्रतिभूतेः वादश्रवणं निराकृतम्। न्यायालयेन उक्तं यत् बांग्लादेश सम्मिलितो सनातनी जागरोण जोते इत्यस्य प्रवक्त्रा चिन्मय-कृष्ण-दासेन याचिका प्रस्तोतुम् अधिवक्ता नैव अधिकृतः आसीत् ।

तमिलनाडु वर्षा

तमिलनाडु-राज्ये वर्षा-कारणेन नैकेषु जनपदेषु जनजीवनं दुष्प्रभावितम्। तिरुनेलवेली, तिरुवल्लूर, कुड्डालोर, तेनकासी तंजावुरेषु अथ च अन्य-क्षेत्रेषु प्रबला वृष्टिः सञ्जाता। अरियालुर-स्थले जलौघ-स्थितौ शिशुं समेत्य सप्त-जनानां जीवनं संरक्षितम् ।

बैडमिण्टन-प्रतिस्पर्धा

बडमिण्टन प्रतिस्पर्धायाम्, त्रीसाजॉली-गायत्रीगोपीचन्द्रयो: भारतीययुगलम् चीनदेशस्य हांग्चाउनगरे प्रचल्यमानायां महिलानां बी.डब्ल्यू-एफ्. वर्ल्ड-टूअर-प्रतिस्पर्धायां जापानदेशीयेन युगलेन पराजयं स्वीकृतवत्। भारतीययुगलमेतत् सप्तदश-एकविंशति: त्रयोदश-एकविंशति च इत्यङ्कान्तराले पराजयम् अभिस्वीकृतवत्।

।।इति वार्ता:।।